# Brahmanaspati Suktam

# બ્રહ્મણસ્પતિસૂક્તમ્

## Document Information

Text title : Brahmanaspati Suktam

File name : brahmaNaspatisUktam.itx

Category : sUkta, veda, svara, ganesha

Location : doc_veda

Proofread by : Mandar Kulkarni

Description-comments : Collection of different Richas

Latest update : March 27, 2016

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 17, 2025

*sanskritdocuments.org*

# Brahmanaspati Suktam

# બ્રહ્મણસ્પતિસૂક્તમ્

ઋગ્વેદાન્તર્ગતમ્

## સસ્વર

(ઋષિઃ - ગૃત્સમદઃ (ભાર્ગવઃ શૌનકઃ) ॥ દેવતા - બ્રહ્મણસ્પતિઃ ॥ છન્દઃ - જગતી ॥

સ્વરઃ - નિષાદઃ ॥)

ગણાનાં ત્વા ગણપતિં હવામહે કવિં કવીનામુપમશ્રવસ્તમમ્ ।
જ્યેષ્ઠરાજં બ્રહ્મણાં બ્રહ્મણસ્પત આ નઃ શૃણ્વન્નૂતિભિઃ સીદ સાદનમ્ ॥ ૨.૦૨૩.૦૧॥

ઋષિઃ- મેધાતિથિઃ કાણ્વઃ ॥

દેવતા - ૧ - ૩ બ્રહ્મણસ્પતિઃ; ૪ બ્રહ્મણસ્પતિરિન્દ્રશ્ચ સોમશ્ચ; ૫ બ્રહ્મણસ્પતિસોમેન્દ્રદક્ષિણાઃ; ॥

છન્દઃ - ૧ વિરાડ્ગાયત્રી; ૨ ગાયત્રી; ૩ પિપીલિકામધ્યાનિચૃદ્-ગાયત્રી ; ૪ નિચૃદ્ગાયત્રી ; ૫ પાદનિચૃદ્ગાયત્રી ॥
સ્વરઃ-ષડ્જઃ ॥

સોમાનં સ્વરણં કૃણુહિ બ્રહ્મણસ્પતે ।
કક્ષીવન્તં ય ઔશિજઃ ॥ ૧.૦૧૮.૦૧ ॥ ૧

યો રેવાન્યો અમીવહા વસુવિત્પુષ્ટિવર્ધનઃ ।
સ નઃ સિષક્તુ યસ્તુરઃ ॥ ૧.૦૧૮.૦૨॥ ૨

મા નઃ શંસો અરરુષો ધૂર્તિઃ પ્રણઙ્મર્ત્યસ્ય ।
રક્ષા ણો બ્રહ્મણસ્પતે ॥ ૧.૦૧૮.૦૩॥ ૩

સ ઘા વીરો ન રિષ્યતિ યમિન્દ્રો બ્રહ્મણસ્પતિઃ ।
સોમો હિનોતિ મર્ત્યમ્ ॥ ૧.૦૧૮.૦૪॥ ૪

ત્વં તં બ્રહ્મણસ્પતે સોમ ઇન્દ્રશ્ચ મર્ત્યમ્ ।
દક્ષિણા પાત્વંહસઃ ॥ ૧.૦૧૮.૦૫॥ ૫

ઋષિઃ-કણ્વો ઘૌરઃ ॥

દેવતા - બૃહસ્પતિઃ ॥

છન્દઃ - ૧, ૨, ૮ નિચૃદુપરિષ્ટાદ્ બૃહતી; ૩, ૭ આર્ચીત્રિષ્ટુપ્; ૪, ૬ સતઃ પઙ્ક્તિર્નિચૃત્પઙ્ક્તિઃ; ૫ પથ્યાબૃહતી ॥
સ્વરઃ - ૧, ૨, ૫, ૮, મધ્યમઃ; ૩, ૭ ધૈવતઃ; ૪, ૬ પઞ્ચમઃ ॥

ઉત્તિષ્ઠ બ્રહ્મણસ્પતે દેવયન્તસ્ત્વેમહે ।
ઉપ પ્ર યન્તુ મરુતઃ સુદાનવ ઇન્દ્ર પ્રાશૂર્ભવા સચા ॥ ૧.૦૪૦.૦૧॥ ૬
ત્વામિદ્ધિ સહસસ્પુત્ર મર્ત્ય ઉપબ્રૂતે ધને હિતે ।
સુવીર્યં મરુત આ સ્વશ્વ્યં દધીત યો વ આચકે ॥ ૧.૦૪૦.૦૨॥ ૭
પ્રૈતુ બ્રહ્મણસ્પતિઃ પ્ર દેવ્યેતુ સૂનૃતા ।
અચ્છા વીરં નર્યં પઙ્ક્તિરાધસં દેવા યજ્ઞં નયન્તુ નઃ ॥ ૧.૦૪૦.૦૩॥ ૮
યો વાઘતે દદાતિ સૂનરં વસુ સ ધત્તે અક્ષિતિ શ્રવઃ ।
તસ્મા ઇળાં સુવીરામા યજામહે સુપ્રતૂર્તિમનેહસમ્ ॥ ૧.૦૪૦.૦૪॥ ૯
પ્ર નૂનં બ્રહ્મણસ્પતિર્મન્ત્રં વદત્યુક્થ્યમ્ ।
યસ્મિન્નિન્દ્રો વરુણો મિત્રો અર્યમા દેવા ઓકાંસિ ચક્રિરે ॥ ૧.૦૪૦.૦૫॥ ૧૦
તમિદ્વોચેમા વિદથેષુ શમ્ભુવં મન્ત્રં દેવા અનેહસમ્ ।
ઇમાં ચ વાચં પ્રતિહર્યથા નરો વિશ્વેદ્વામા વો અશ્નવત્ ॥ ૧.૦૪૦.૦૬॥ ૧૧
કો દેવયન્તમશ્નવજ્જનં કો વૃક્તબર્હિષમ્ ।
પ્રપ્ર દાશ્વાન્પસ્ત્યાભિરસ્થિતાન્તર્વાવત્ક્ષયં દધે ॥ ૧.૦૪૦.૦૭॥ ૧૨
ઉપ ક્ષત્રં પૃઞ્ચીત હન્તિ રાજભિર્ભયે ચિત્સુક્ષિતિં દધે ।
નાસ્ય વર્તા ન તરુતા મહાધને નાર્ભે અસ્તિ વજ્રિણઃ ॥ ૧.૦૪૦.૦૮॥ ૧૩

ઋષિઃ- ગૃત્સમદઃ ॥

દેવતા - ૧, ૫, ૯, ૧૧, ૧૭, ૧૯ બ્રહ્મણસ્પતિઃ; ૨-૪, ૬-૮, ૧૦, ૧૨-૧૬, ૧૮ બૃહસ્પતિઃ ॥

છન્દઃ—૧, ૪, ૫, ૧૦-૧૨ જગતી; ૨, ૭-૯, ૧૩, ૧૪ વિરાડ્જગતી;
૩, ૬, ૧૬, ૧૮ નિચૃજ્જગતી; ૧૫, ૧૭ ભુરિક્ત્રિષ્ટુપ્; ૧૯ નિચૃત્ત્રિષ્ટુપ્ ॥ સ્વરઃ-૧-૧૪, ૧૬, ૧૮ નિષાદઃ ; ૧૫, ૧૭, ૧૯ ધૈવતઃ ॥

ગણાનાં ત્વા ગણપતિં હવામહે કવિં કવીનામુપમશ્રવસ્તમમ્ ।
જ્યેષ્ઠરાજં બ્રહ્મણાં બ્રહ્મણસ્પત આ નઃ શૃ॒ણ્વન્નૂતિભિઃ સીદ સાદનમ્ ॥ ૨.૦૨૩.૦૧॥ ૧૪

દેવાશ્ચિત્તે અસુર્ય પ્રચેતસો બૃહસ્પતે યજ્ઞિયં ભાગમાનશુઃ ।
ઉસ્રા ઇવ સૂર્યો જ્યોતિષા મહો વિશ્વેષામિજ્જનિતા બ્રહ્મણામસિ ॥ ૨.૦૨૩.૦૨॥ ૧૫
આ વિબાધ્યા પરિરાપસ્તમાંસિ ચ જ્યોતિષ્મન્તં રથમૃતસ્ય તિષ્ઠસિ ।
બૃહસ્પતે ભીમમમિત્રદમ્ભનં રક્ષોહણં ગોત્રભિદં સ્વર્વિદમ્ ॥ ૨.૦૨૩.૦૩॥ ૧૬
સુનીતિભિર્નયસિ ત્રાયસે જનં યસ્તુભ્યં દાશાન્ન તમંહો અશ્નવત્ ।
બ્રહ્મદ્વિષસ્તપનો મન્યુમીરસિ બૃહસ્પતે મહિ તત્તે મહિત્વનમ્ ॥ ૨.૦૨૩.૦૪॥ ૧૭
ન તમંહો ન દુરિતં કુતશ્ચન નારાતયસ્તિતિરુર્ન દ્વયાવિનઃ ।
વિશ્વા ઇદસ્માદ્ધ્વરસો વિ બાધસે યં સુગોપા રક્ષસિ બ્રહ્મણસ્પતે ॥ ૨.૦૨૩.૦૫॥ ૧૮
ત્વં નો ગોપાઃ પથિકૃદ્વિચક્ષણસ્તવ વ્રતાય મતિભિર્જરામહે ।
બૃહસ્પતે યો નો અભિ હ્વરો દધે સ્વા તં મર્મર્તુ દુચ્છુના હરસ્વતી ॥ ૨.૦૨૩.૦૬॥ ૧૯
ઉત વા યો નો મર્ચયાદનાગસોઽરાતીવા મર્તઃ સાનુકો વૃકઃ ।
બૃહસ્પતે અપ તં વર્તયા પથઃ સુગં નો અસ્યૈ દેવવીતયે કૃધિ ॥ ૨.૦૨૩.૦૭॥ ૨૦
ત્રાતારં ત્વા તનૂનાં હવામહેઽવસ્પર્તરધિવક્તારમસ્મયુમ્ ।
બૃહસ્પતે દેવનિદો નિ બર્હય મા દુરેવા ઉત્તરં સુમ્નમુન્નશન્ ॥ ૨.૦૨૩.૦૮॥ ૨૧
ત્વયા વયં સુવૃધા બ્રહ્મણસ્પતે સ્પાર્હા વસુ મનુષ્યા દદીમહિ ।
યા નો દૂરે તળિતો યા અરાતયોઽભિ સન્તિ જમ્ભયા તા અનપ્રસઃ ॥ ૨.૦૨૩.૦૯॥ ૨૨
ત્વયા વયમુત્તમં ધીમહે વયો બૃહસ્પતે પપ્રિણા સસ્નિના યુજા ।
મા નો દુઃશંસો અભિદિપ્સુરીશત પ્ર સુશંસા મતિભિસ્તારિષીમહિ ॥ ૨.૦૨૩.૧૦॥ ૨૩
અનાનુદો વૃષભો જગ્મિરાહવં નિષ્ટપ્તા શત્રું પૃતનાસુ સાસહિઃ ।
અસિ સત્ય ઋણયા બ્રહ્મણસ્પત ઉગ્રસ્ય ચિદ્દમિતા વીળુહર્ષિણઃ ॥ ૨.૦૨૩.૧૧॥ ૨૪
અદેવેન મનસા યો રિષણ્યતિ શાસામુગ્રો મન્યમાનો જિઘાંસતિ ।
બૃહસ્પતે મા પ્રણક્તસ્ય નો વધો નિ કર્મ મન્યું દુરેવસ્ય શર્ધતઃ ॥ ૨.૦૨૩.૧૨॥ ૨૫
ભરેષુ હવ્યો નમસોપસદ્યો ગન્તા વાજેષુ સનિતા ધનંધનમ્ ।
વિશ્વા ઇદર્યો અભિદિપ્સ્વોઉ મૃધો બૃહસ્પતિર્વિ વવર્હા રથાઁ ઇવ ॥ ૨.૦૨૩.૧૩॥ ૨૬
તેજિષ્ઠયા તપની રક્ષસસ્તપ યે ત્વા નિદે દધિરે દૃષ્ટવીર્યમ્ ।
આવિસ્તત્કૃષ્વ યદસત્ત ઉક્થ્યં૧ બૃહસ્પતે વિ પરિરાપો અર્દય ॥ ૨.૦૨૩.૧૪॥ ૨૭
બૃહસ્પતે અતિ યદર્યો અર્હાદ્દ્યુમદ્વિભાતિ ક્રતુમજ્જનેષુ ।

યદ્દીદયચ્છવસ ઋતપ્રજાત તદસ્માસુ દ્રવિણં ધેહિ ચિત્રમ્ ॥ ૨.૦૨૩.૧૫॥ ૨૮

મા નઃ સ્તેનેભ્યો યે અભિ દ્રુહસ્પદે નિરામિણો રિપવોઽન્નેષુ જાગૃધુઃ ।

આ દેવાનામોહતે વિ વ્રયો હૃદિ બૃહસ્પતે ન પરઃ સામ્નો વિદુઃ ॥ ૨.૦૨૩.૧૬॥ ૨૯

વિશ્વેભ્યો હિ ત્વા ભુવનેભ્યસ્પરિ ત્વષ્ટાજનત્સામ્નઃસામ્નઃ કવિઃ ।

સ ઋણચિદૃણયા બ્રહ્મણસ્પતિર્દ્રુહો હન્તા મહ ઋતસ્ય ધર્તરિ ॥ ૨.૦૨૩.૧૭॥ ૩૦

તવ શ્રિયે વ્યજિહીત પર્વતો ગવાં ગોત્રમુદસૃજો યદઙ્ગિરઃ ।

ઇન્દ્રેણ યુજા તમસા પરીવૃતં બૃહસ્પતે નિરપામૌબ્જો અર્ણવમ્ ॥ ૨.૦૨૩.૧૮॥ ૩૧

બ્રહ્મણસ્પતે ત્વમસ્ય યન્તા સૂક્તસ્ય બોધિ તનયં ચ જિન્વ ।

વિશ્વં તદ્ભદ્રં યદવન્તિ દેવા બૃહદ્વદેમ વિદથે સુવીરાઃ ॥ ૨.૦૨૩.૧૯॥ ૩૨

ઋષિઃ - ગૃત્સમદઃ ॥

દેવતા - ૧ - ૧૧, ૧૩ - ૧૬ બ્રહ્મણસ્પતિઃ; ૧૨ બ્રહ્મણસ્પતિરિન્દ્રશ્ચ ॥

છન્દઃ - ૧,૭, ૯, ૧૧ નિચૃજ્જગતી; ૨, ૩ ત્રિષ્ટુપ્ ૪, ૫ સ્વરાટ્ત્રિષ્ટુપ્; ૬, ૮, ૧૪ જગતી; ૧૦ સ્વરાડ્ જગતી; ૧૨, ૧૬ નિચૃત્ત્રિષ્ટુપ્ ; ૧૩ ભુરિગ્જગતી; ૧૫ ભુરિક્ત્રિષ્ટુપ્ ॥

સ્વરઃ - ૧, ૬ - ૧૧, ૧૩, ૧૪ નિષાદઃ ; ૨-૫, ૧૨, ૧૫, ૧૬ ધૈવતઃ ॥

સેમામવિડ્ઢિ પ્રભૃતિં ય ઈશિષેઽયા વિધેમ નવયા મહા ગિરા ।

યથા નો મીઢ્વાન્સ્તવતે સખા તવ બૃહસ્પતે સીષધઃ સોત નો મતિમ્ ॥ ૨.૦૨૪.૦૧॥ ૩૩

યો નન્ત્વાન્યનમન્ન્યોજસોતાદર્દર્મન્યુના શમ્બરાણિ વિ ।

પ્રાચ્યાવયદચ્યુતા બ્રહ્મણસ્પતિરા ચાવિશદ્વસુમન્તં વિ પર્વતમ્ ॥ ૨.૦૨૪.૦૨॥ ૩૪

તદ્દેવાનાં દેવતમાય કર્ત્વમશ્રથ્નન્દૃળ્હાવ્રદન્ત વીળિતા ।

ઉદ્ગા આજદભિનદ્બ્રહ્મણા વલમગૂહત્તમો વ્યચક્ષયત્સ્વઃ ॥ ૨.૦૨૪.૦૩॥ ૩૫

અશ્માસ્યમવતં બ્રહ્મણસ્પતિર્મધુધારમભિ યમોજસાતૃણત્ ।

તમેવ વિશ્વે પપિરે સ્વર્દૃશો બહુ સાકં સિસિચુરુત્સમુદ્રિણમ્ ॥ ૨.૦૨૪.૦૪॥ ૩૬

સના તા કા ચિદ્ભુવના ભવીત્વા માદ્ભિઃ શરદ્ભિર્દુરો વરન્ત વઃ ।

અયતન્તા ચરતો અન્યદન્યદિદ્યા ચકાર વયુના બ્રહ્મણસ્પતિઃ ॥ ૨.૦૨૪.૦૫॥ ૩૭

અભિનક્ષન્તો અભિ યે તમાનશુર્નિધિં પણીનાં પરમં ગુહા હિતમ્ ।

તે વિદ્વાંસઃ પ્રતિચક્ષ્યાનૃતા પુનર્યત ઉ આયન્તદુદીયુરાવિશમ્ ॥ ૨.૦૨૪.૦૬॥ ૩૮

ઋતાવાનઃ પ્રતિચક્ષ્યાનૃતા પુનરાત આ તસ્થુઃ કવયો મહસ્પથઃ ।

તે બાહુભ્યાં ધમિતમગ્નિમશ્મનિ નકિઃ ષો અસ્ત્યરણો જહુર્હિ તમ્ ॥ ૨.૦૨૪.૦૭॥ ૩૯

ઋતજ્યેન ક્ષિપ્રેણ બ્રહ્મણસ્પતિર્યત્ર વષ્ટિ પ્ર તદશ્નોતિ ધન્વના ।

તસ્ય સાધ્વીરિષવો યાભિરસ્યતિ નૃચક્ષસો દૃશયે કર્ણયોનયઃ ॥ ૨.૦૨૪.૦૮॥ ૪૦

સ સંનયઃ સ વિનયઃ પુરોહિતઃ સ સુષ્ટુતઃ સ યુધિ બ્રહ્મણસ્પતિઃ ।

ચાક્ષ્મો યદ્વાજં ભરતે મતી ધનાદિત્સૂર્યસ્તપતિ તપ્યતુર્વૃથા ॥ ૨.૦૨૪.૦૯॥ ૪૧

વિભુ પ્રભુ પ્રથમં મેહનાવતો બૃહસ્પતેઃ સુવિદત્રાણિ રાધ્યા ।

ઇમા સાતાનિ વેન્યસ્ય વાજિનો યેન જના ઉભયે ભુઞ્જતે વિશઃ ॥ ૨.૦૨૪.૧૦॥ ૪૨

યોઽવરે વૃજને વિશ્વથા વિભુર્મહામુ રણ્વઃ શવસા વવક્ષિથ ।

સ દેવો દેવાન્પ્રતિ પપ્રથે પૃથુ વિશ્વેદુ તા પરિભૂર્બ્રહ્મણસ્પતિઃ ॥ ૨.૦૨૪.૧૧॥ ૪૩

વિશ્વં સત્યં મઘવાના યુવોરિદાપશ્ચન પ્ર મિનન્તિ વ્રતં વામ્ ।

અચ્છેન્દ્રાબ્રહ્મણસ્પતી હવિર્નોઽન્નં યુજેવ વાજિના જિગાતમ્ ॥ ૨.૦૨૪.૧૨॥ ૪૪

ઉતાશિષ્ઠા અનુ શ઼ૃણ્વન્તિ વહ્નયઃ સભેયો વિપ્રો ભરતે મતી ધના ।

વીળુદ્વેષા અનુ વશ ઋણમાદદિઃ સ હ વાજી સમિથે બ્રહ્મણસ્પતિઃ ॥ ૨.૦૨૪.૧૩॥ ૪૫

બ્રહ્મણસ્પતેરભવદ્યથાવશં સત્યો મન્યુર્મહિ કર્મા કરિષ્યતઃ ।

યો ગા ઉદાજત્સ દિવે વિ ચાભજન્મહીવ રીતિઃ શવસાસરત્પૃથક્ ॥ ૨.૦૨૪.૧૪॥ ૪૬

બ્રહ્મણસ્પતે સુયમસ્ય વિશ્વહા રાયઃ સ્યામ રથ્યોઉ વયસ્વતઃ ।

વીરેષુ વીરાઁ ઉપ પૃઙ્ધિ નસ્ત્વં યદીશાનો બ્રહ્મણા વેષિ મે હવમ્ ॥ ૨.૦૨૪.૧૫॥ ૪૭

બ્રહ્મણસ્પતે ત્વમસ્ય યન્તા સૂક્તસ્ય બોધિ તનયં ચ જિન્વ ।

વિશ્વં તદ્ભદ્રં યદવન્તિ દેવા બૃહદ્વદેમ વિદથે સુવીરાઃ ॥ ૨.૦૨૪.૧૬॥ ૪૮

ઋષિઃ-ગૃત્સમદઃ॥

દેવતા - બ્રહ્મણસ્પતિઃ ॥

છન્દઃ - ૧, ૨ જગતી; ૩ નિચૃજ્જગતી; ૪, ૫ વિરાડ્જગતી ॥

સ્વરઃ- નિષાદઃ ॥

ઇન્ધાનો અગ્નિં વનવદ્વનુષ્યતઃ કૃતબ્રહ્મા શૂશુવદ્રાતહવ્ય ઇત્ ।

જાતેન જાતમતિ સ પ્ર સર્સૃતે યંયં યુજં કૃણુતે બ્રહ્મણસ્પતિઃ ॥ ૨.૦૨૫.૦૧॥ ૪૯

વીરેભિર્વીરાન્વનવદ્વનુષ્યતો ગોભી રયિં પપ્રથદ્બોધતિ ત્મના ।

તોકં ચ તસ્ય તનયં ચ વર્ધતે યંયં યુજં કૃણુતે બ્રહ્મણસ્પતિઃ ॥ ૨.૦૨૫.૦૨॥ ૫૦

સિન્ધુર્ન ક્ષોદઃ શિમીવાઁ ઋઘાયતો વૃષેવ વધ્રીઁરભિ વષ્ટ્યોજસા ।
અગ્નેરિવ પ્રસિતિર્નાહ વર્તવે યંયં યુજં કૃણુતે બ્રહ્મણસ્પતિઃ ॥ ૨.૦૨૫.૦૩॥ ૫૧
તસ્મા અર્ષન્તિ દિવ્યા અસશ્ચતઃ સ સત્વભિઃ પ્રથમો ગોષુ ગચ્છતિ ।
અનિભૃષ્ટતવિષિર્હન્ત્યોજસા યંયં યુજં કૃણુતે બ્રહ્મણસ્પતિઃ ॥ ૨.૦૨૫.૦૪॥ ૫૨
તસ્મા ઇદ્વિશ્વે ધુનયન્ત સિન્ધવોઽચ્છિદ્રા શર્મ દધિરે પુરૂણિ ।
દેવાનાં સુમ્ને સુભગઃ સ એધતે યંયં યુજં કૃણુતે બ્રહ્મણસ્પતિઃ ॥ ૨.૦૨૫.૦૫॥ ૫૩

ઋષિઃ-ગૃત્સમદઃ ॥

દેવતા - બ્રહ્મણસ્પતિઃ ॥

છન્દઃ - ૧, ૩ જગતી; ૨, ૪ નિચૃજ્જગતી ॥

સ્વરઃ- નિષાદઃ ॥

ઋજુરિચ્છંસો વનવદ્વનુષ્યતો દેવયન્નિદદેવયન્તમભ્યસત્ ।
સુપ્રાવીરિદ્વનવત્પૃત્સુ દુષ્ટરં યજ્વેદયજ્યોર્વિ ભજાતિ ભોજનમ્ ॥ ૨.૦૨૬.૦૧॥ ૫૪
યજસ્વ વીર પ્ર વિહિ મનાયતો ભદ્રં મનઃ કૃણુષ્વ વૃત્રતૂર્યે ।
હવિષ્કૃણુષ્વ સુભગો યથાસસિ બ્રહ્મણસ્પતેરવ આ વૃણીમહે ॥ ૨.૦૨૬.૦૨॥ ૫૫
સ ઇજ્જનેન સ વિશા સ જન્મના સ પુત્રૈર્વાજં ભરતે ધના નૃભિઃ ।
દેવાનાં યઃ પિતરમાવિવાસતિ શ્રદ્ધામના હવિષા બ્રહ્મણસ્પતિમ્ ॥ ૨.૦૨૬.૦૩॥ ૫૬
યો અસ્મૈ હવ્યૈર્ઘૃતવદ્ભિરવિધત્પ્ર તં પ્રાચા નયતિ બ્રહ્મણસ્પતિઃ ।
ઉરુષ્યતીમંહસો રક્ષતી રિષોંઽહોશ્ચિદસ્મા ઉરુચક્રિરદ્ભુતઃ ॥ ૨.૦૨૬.૦૪॥ ૫૭

ઋષિઃ- વસિષ્ઠઃ ॥

દેવતા - ઇન્દ્રાબ્રહ્મણસ્પતી ॥

છન્દઃ - નિચૃત્રિષ્ટુપ્ ॥

સ્વરઃ - ધૈવતઃ ॥

તમુ જ્યેષ્ઠં નમસા હવિર્ભિઃ સુશેવં બ્રહ્મણસ્પતિં ગૃણીષે ।
ઇન્દ્રં શ્લોકો મહિ દૈવ્યઃ સિષક્તુ યો બ્રહ્મણો દેવકૃતસ્ય રાજા ॥ ૭.૦૯૭.૦૩॥ ૫૮

ઇયં વાં બ્રહ્મણસ્પતે સુવૃક્તિર્બ્રહ્મેન્દ્રાય વજ્રિણે અકારિ ।
અવિષ્ટં ધિયો જિગૃતં પુરંધીર્જજસ્તમર્યો વનુષામરાતીઃ ॥ ૭.૦૯૭.૦૯॥ ૫૯

ઋષિઃ- શિરિમ્બિઠો ભારદ્વાજઃ ॥

દેવતા - બ્રહ્મણસ્પતિઃ ॥

છન્દઃ- ૨ નિચૃદનુષ્ટુપ્ ૩ અનુષ્ટુપ્ ॥

સ્વરઃ - ગાન્ધારઃ ॥

ચત્તો ઇતશ્ચત્તામુતઃ સર્વા ભ્રૂણાન્યારુષી ।
અરાય્યં બ્રહ્મણસ્પતે તીક્ષ્ણશૃઙ્ગોદૃષન્નિહિ ॥ ૧૦.૧૫૫.૦૨॥ ૬૦
અદો યદ્દારુ પ્લવતે સિન્ધોઃ પારે અપૂરુષમ્ ।
તદા રભસ્વ દુર્હણો તેન ગચ્છ પરસ્તરમ્ ॥ ૧૦.૧૫૫.૦૩॥ ૬૧

ખિલ મન્ત્રઃ -
અગ્નિર્યેન વિરાજતિ સૂર્યો યેન વિરાજતિ ।
વિરાજ્યેન વિરાજતિ તેનાસ્માન્ બ્રહ્મણસ્પતે વિરાજ સમિધં કુરુ ॥ ૧૦.૧૨૮.૧૨॥ ૬૨ (From Rigveda Khilas)

ઋષિઃ-પાયુર્ભારદ્વાજઃ ॥

દેવતા - યુદ્ધભૂમિર્બ્રહ્મણસ્પતિરદિતિશ્ચ ॥

છન્દઃ—પઙ્ક્તિઃ॥

સ્વરઃ- પઞ્ચમઃ ॥

યત્ર બાણાઃ સમ્પતન્તિ કુમારા વિશિખા ઇવ ।
તત્રા નો બ્રહ્મણસ્પતિરદિતિઃ શર્મ યચ્છતુ વિશ્વાહા શર્મ યચ્છતુ ॥ ૬.૦૭૫.૧૭॥ ૬૩

ઋષિઃ-પ્રચેતાઃ॥

દેવતા - દુઃસ્વપ્નઘ્નમ્ ॥

છન્દઃ - વિરાડનુષ્ટુપ્ ॥

સ્વરઃ- ગાન્ધારઃ ॥

યદિન્દ્ર બ્રહ્મણસ્પતેઽભિદ્રોહં ચરામસિ ।
પ્રચેતા ન આઙ્ગિરસો દ્વિષતાં પાત્વંહસઃ ॥ ૧૦.૧૬૪.૦૪॥ ૬૪

ઋષિઃ- નભઃપ્રભેદનો વૈરૂપઃ ॥

દેવતા - ઇન્દ્રઃ ॥

છન્દઃ - નિચૃત્ત્રિષ્ટુપ્ ॥

સ્વરઃ - ધૈવતઃ ॥

નિ ષુ સીદ ગણપતે ગણેષુ ત્વામાહુર્વિપ્રતમં કવીનામ્ ।
ન ઋતે ત્વત્ક્રિયતે કિં ચનારે મહામર્કં મઘવઞ્ચિત્રમર્ચ ॥ ૧૦.૧૧૨.૦૯॥ ૬૫

ઋષિઃ - બન્ધ્વાદયો ગૌપાયનાઃ ॥

દેવતા - હસ્તઃ ॥

છન્દઃ - નિચૃદનુષ્ટુપ્ ॥

સ્વરઃ - ગાન્ધારઃ ॥

અયં મે હસ્તો ભગવાનયં મે ભગવત્તરઃ ।
અયં મે વિશ્વભેષજોઽયં શિવાભિમર્શનઃ ॥ ૧૦.૦૬૦.૧૨॥ ૬૬

ઋષિઃ—કુસીદી કાણ્વઃ ॥

દેવતા-ઇન્દ્રઃ ॥

છન્દઃ- ૧, ૫, ૮ ગાયત્રી; ૨, ૩, ૬, ૭ નિચૃદ્ગાયત્રી; ૪, ૯ વિરાડ્ગાયત્રી ॥

સ્વરઃ —ષડ્જઃ ॥

આ તૂ ન ઇન્દ્ર ક્ષુમન્તં ચિત્રં ગ્રાભં સં ગૃભાય ।
મહાહસ્તી દક્ષિણેન ॥ ૮.૦૮૧.૦૧॥

વિદ્મા હિ ત્વા તુવિકૂર્મિં તુવિદેષ્ણં તુવીમઘમ્ ।
તુવિમાત્રમવોભિઃ ॥ ૮.૦૮૧.૦૨॥

નહિ ત્વા શૂર દેવા ન મર્તાસો દિત્સન્તમ્ ।
ભીમં ન ગાં વારયન્તે ॥ ૮.૦૮૧.૦૩॥

એતો ન્વિન્દ્રં સ્તવામેશાનં વસ્વઃ સ્વરાજમ્ ।
ન રાધસા મર્ધિષન્નઃ ॥ ૮.૦૮૧.૦૪॥

પ્ર સ્તોષદુપ ગાસિષચ્છ્રવત્સામ ગીયમાનમ્ ।
અભિ રાધસા જુગુરત્ ॥ ૮.૦૮૧.૦૫॥

આ નો ભર દક્ષિણેનાભિ સવ્યેન પ્ર મૃશ ।
ઇન્દ્ર મા નો વસોર્નિર્ભાક્ ॥ ૮.૦૮૧.૦૬॥

ઉપ ક્રમસ્વા ભર ધૃષતા ધૃષ્ણો જનાનામ્ ।
અદાશૂષ્ટરસ્ય વેદઃ ॥ ૮.૦૮૧.૦૭॥

ઇન્દ્ર ય ઉ નુ તે અસ્તિ વાજો વિપ્રેભિઃ સનિત્વઃ ।
અસ્માભિઃ સુ તં સનુહિ ॥ ૮.૦૮૧.૦૮॥

સદ્યોજુવસ્તે વાજા અસ્મભ્યં વિશ્વશ્ચન્દ્રાઃ ।
વશૈશ્ચ મક્ષૂ જરન્તે ॥ ૮.૦૮૧.૦૯॥

॥ ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

ઇતિ બ્રહ્મણસ્પતિસૂક્તં સમ્પૂર્ણમ્ ॥

## નિઃસ્વર

(ઋષિઃ - ગૃત્સમદઃ॥ દેવતા - બ્રહ્મણસ્પતિઃ ॥ છન્દઃ - જગતી ॥

સ્વરઃ - નિષાદઃ ॥)

ગણાનાં ત્વા ગણપતિં હવામહે કવિં કવીનામુપમશ્રવસ્તમમ્ ।
જ્યેષ્ઠરાજં બ્રહ્મણાં બ્રહ્મણસ્પત આ નઃ શ઼ૃણ્વન્નૂતિભિઃ સીદ સાદનમ્ ॥ ૨.૦૨૩.૦૧॥

ઋષિઃ- મેધાતિથિઃ કાણ્વઃ ॥

દેવતા - ૧ - ૩ બ્રહ્મણસ્પતિઃ; ૪ બ્રહ્મણસ્પતિરિન્દ્રશ્ચ સોમશ્ચ; ૫ બ્રહ્મણસ્પતિસોમેન્દ્રદક્ષિણાઃ; ॥

છન્દઃ - ૧ વિરાડ્ગાયત્રી; ૨ ગાયત્રી; ૩ પિપીલિકામધ્યાનિચૃદ્-ગાયત્રી ; ૪ નિચૃદ્ગાયત્રી ; ૫ પાદનિચૃદ્ગાયત્રી ॥
સ્વરઃ-ષડ્જઃ ॥

સોમાનં સ્વરણં કૃણુહિ બ્રહ્મણસ્પતે ।
કક્ષીવન્તં ય ઔશિજઃ ॥ ૧.૦૧૮.૦૧ ॥ ૧
યો રેવાન્યો અમીવહા વસુવિત્પુષ્ટિવર્ધનઃ ।
સ નઃ સિષક્તુ યસ્તુરઃ ॥ ૧.૦૧૮.૦૨॥ ૨
મા નઃ શંસો અરરુષો ધૂર્તિઃ પ્રણઙ્મર્ત્યસ્ય ।
રક્ષા ણો બ્રહ્મણસ્પતે ॥ ૧.૦૧૮.૦૩॥ ૩
સ ઘા વીરો ન રિષ્યતિ યમિન્દ્રો બ્રહ્મણસ્પતિઃ ।

સોમો હિનોતિ મર્ત્યમ્ ॥ ૧.૦૧૮.૦૪॥ ૪
ત્વં તં બ્રહ્મણસ્પતે સોમ ઇન્દ્રશ્ચ મર્ત્યમ્ ।
દક્ષિણા પાત્વંહસઃ ॥ ૧.૦૧૮.૦૫॥ ૫

ઋષિઃ-કણ્વો ઘૌરઃ ॥

દેવતા - બૃહસ્પતિઃ ॥
છન્દઃ - ૧, ૨, ૮ નિચૃદુપરિષ્ટાદ્ બૃહતી; ૩, ૭ આર્ચીત્રિષ્ટુપ્; ૪, ૬ સતઃ પઙ્ક્તિર્નિચૃત્પઙ્ક્તિઃ; ૫ પથ્યાબૃહતી ॥
સ્વરઃ - ૧, ૨, ૫, ૮, મધ્યમઃ; ૩, ૭ ધૈવતઃ; ૪, ૬ પઞ્ચમઃ ॥

ઉત્તિષ્ઠ બ્રહ્મણસ્પતે દેવયન્તસ્ત્વેમહે ।
ઉપ પ્ર યન્તુ મરુતઃ સુદાનવ ઇન્દ્ર પ્રાશૂર્ભવા સચા ॥ ૧.૦૪૦.૦૧॥ ૬
ત્વામિદ્ધિ સહસસ્પુત્ર મર્ત્ય ઉપબ્રૂતે ધને હિતે ।
સુવીર્યં મરુત આ સ્વશ્વ્યં દધીત યો વ આચકે ॥ ૧.૦૪૦.૦૨॥ ૭
પ્રૈતુ બ્રહ્મણસ્પતિઃ પ્ર દેવ્યેતુ સૂનૃતા ।
અચ્છા વીરં નર્યં પઙ્ક્તિરાધસં દેવા યજ્ઞં નયન્તુ નઃ ॥ ૧.૦૪૦.૦૩॥ ૮
યો વાઘતે દદાતિ સૂનરં વસુ સ ધત્તે અક્ષિતિ શ્રવઃ ।
તસ્મા ઇળાં સુવીરામા યજામહે સુપ્રતૂર્તિમનેહસમ્ ॥ ૧.૦૪૦.૦૪॥ ૯
પ્ર નૂનં બ્રહ્મણસ્પતિર્મન્ત્રં વદત્યુક્થ્યમ્ ।
યસ્મિન્નિન્દ્રો વરુણો મિત્રો અર્યમા દેવા ઓકાંસિ ચક્રિરે ॥ ૧.૦૪૦.૦૫॥ ૧૦
તમિદ્વોચેમા વિદથેષુ શમ્ભુવં મન્ત્રં દેવા અનેહસમ્ ।
ઇમાં ચ વાચં પ્રતિહર્યથા નરો વિશ્વેદ્વામા વો અશ્નવત્ ॥ ૧.૦૪૦.૦૬॥ ૧૧
કો દેવયન્તમશ્નવજ્જનં કો વૃક્તબર્હિષમ્ ।
પ્રપ્ર દાશ્વાન્પસ્ત્યાભિરસ્થિતાન્તર્વાવત્ક્ષયં દધે ॥ ૧.૦૪૦.૦૭॥ ૧૨
ઉપ ક્ષત્રં પૃઞ્ચીત હન્તિ રાજભિર્ભયે ચિત્સુક્ષિતિં દધે ।
નાસ્ય વર્તા ન તરુતા મહાધને નાર્ભે અસ્તિ વજ્રિણઃ ॥ ૧.૦૪૦.૦૮॥ ૧૩

ઋષિઃ- ગૃત્સમદઃ ॥

દેવતા - ૧, ૫, ૯, ૧૧, ૧૭, ૧૯ બ્રહ્મણસ્પતિઃ; ૨-૪, ૬-૮, ૧૦, ૧૨-૧૬, ૧૮ બૃહસ્પતિઃ ॥

છન્દઃ—૧, ૪, ૫, ૧૦-૧૨ જગતી; ૨, ૭-૯, ૧૩, ૧૪ વિરાડ્જગતી;
૩, ૬, ૧૬, ૧૮ નિચૃજ્જગતી; ૧૫, ૧૭ ભુરિક્ત્રિષ્ટુપ્; ૧૯ નિચૃત્ત્રિષ્ટુપ્ ॥ સ્વરઃ-૧-૧૪, ૧૬, ૧૮ નિષાદઃ ; ૧૫, ૧૭, ૧૯ ધૈવતઃ ॥

ગણાનાં ત્વા ગણપતિં હવામહે કવિં કવીનામુપમશ્રવસ્તમમ્ ।
જ્યેષ્ઠરાજં બ્રહ્મણાં બ્રહ્મણસ્પત આ નઃ શ઼ૃણ્વન્નૂતિભિઃ સીદ સાદનમ્ ॥ ૨.૦૨૩.૦૧॥ ૧૪

દેવાશ્ચિત્તે અસુર્ય પ્રચેતસો બૃહસ્પતે યજ્ઞિયં ભાગમાનશુઃ ।
ઉસ્રા ઇવ સૂર્યો જ્યોતિષા મહો વિશ્વેષામિજ્જનિતા બ્રહ્મણામસિ ॥ ૨.૦૨૩.૦૨॥ ૧૫
આ વિબાધ્યા પરિરાપસ્તમાંસિ ચ જ્યોતિષ્મન્તં રથમૃતસ્ય તિષ્ઠસિ ।
બૃહસ્પતે ભીમમમિત્રદમ્ભનં રક્ષોહણં ગોત્રભિદં સ્વર્વિદમ્ ॥ ૨.૦૨૩.૦૩॥ ૧૬
સુનીતિભિર્નયસિ ત્રાયસે જનં યસ્તુભ્યં દાશાન્ન તમંહો અશ્નવત્ ।
બ્રહ્મદ્વિષસ્તપનો મન્યુમીરસિ બૃહસ્પતે મહિ તત્તે મહિત્વનમ્ ॥ ૨.૦૨૩.૦૪॥ ૧૭
ન તમંહો ન દુરિતં કુતશ્ચન નારાતયસ્તિતિરુર્ન દ્વયાવિનઃ ।
વિશ્વા ઇદસ્માદ્ધ્વરસો વિ બાધસે યં સુગોપા રક્ષસિ બ્રહ્મણસ્પતે ॥ ૨.૦૨૩.૦૫॥ ૧૮
ત્વં નો ગોપાઃ પથિકૃદ્વિચક્ષણસ્તવ વ્રતાય મતિભિર્જરામહે ।
બૃહસ્પતે યો નો અભિ હ્વરો દધે સ્વા તં મર્મર્તુ દુચ્છુના હરસ્વતી ॥ ૨.૦૨૩.૦૬॥ ૧૯
ઉત વા યો નો મર્ચયાદનાગસોઽરાતીવા મર્તઃ સાનુકો વૃકઃ ।
બૃહસ્પતે અપ તં વર્તયા પથઃ સુગં નો અસ્યૈ દેવવીતયે કૃધિ ॥ ૨.૦૨૩.૦૭॥ ૨૦
ત્રાતારં ત્વા તનૂનાં હવામહેઽવસ્પર્તરધિવક્તારમસ્મયુમ્ ।
બૃહસ્પતે દેવનિદો નિ બર્હય મા દુરેવા ઉત્તરં સુમ્નમુન્નશન્ ॥ ૨.૦૨૩.૦૮॥ ૨૧
ત્વયા વયં સુવૃધા બ્રહ્મણસ્પતે સ્પાર્હા વસુ મનુષ્યા દદીમહિ ।
યા નો દૂરે તળિતો યા અરાતયોઽભિ સન્તિ જમ્ભયા તા અનપ્નસઃ ॥ ૨.૦૨૩.૦૯॥ ૨૨
ત્વયા વયમુત્તમં ધીમહે વયો બૃહસ્પતે પપ્રિણા સસ્નિના યુજા ।
મા નો દુઃશંસો અભિદિપ્સુરીશત પ્ર સુશંસા મતિભિસ્તારિષીમહિ ॥ ૨.૦૨૩.૧૦॥ ૨૩
અનાનુદો વૃષભો જગ્મિરાહવં નિષ્ટપ્તા શત્રું પૃતનાસુ સાસહિઃ ।
અસિ સત્ય ઋણયા બ્રહ્મણસ્પત ઉગ્રસ્ય ચિદ્દમિતા વીળુહર્ષિણઃ ॥ ૨.૦૨૩.૧૧॥ ૨૪
અદેવેન મનસા યો રિષણ્યતિ શાસામુગ્રો મન્યમાનો જિઘાંસતિ ।
બૃહસ્પતે મા પ્રણક્તસ્ય નો વધો નિ કર્મ મન્યું દુરેવસ્ય શર્ધતઃ ॥ ૨.૦૨૩.૧૨॥ ૨૫
ભરેષુ હવ્યો નમસોપસદ્યો ગન્તા વાજેષુ સનિતા ધનંધનમ્ ।
વિશ્વા ઇદર્યો અભિદિપ્સ્વોઉ મૃધો બૃહસ્પતિર્વિ વવર્હા રથાઁ ઇવ ॥ ૨.૦૨૩.૧૩॥ ૨૬
તેજિષ્ઠયા તપની રક્ષસસ્તપ યે ત્વા નિદે દધિરે દૃષ્ટવીર્યમ્ ।
આવિસ્તત્કૃષ્વ યદસત્ત ઉક્થ્યં૧ બૃહસ્પતે વિ પરિરાપો અર્દય ॥ ૨.૦૨૩.૧૪॥ ૨૭
બૃહસ્પતે અતિ યદર્યો અર્હાદ્દ્યુમદ્વિભાતિ ક્રતુમજ્જનેષુ ।
યદ્દીદયચ્છવસ ઋતપ્રજાત તદસ્માસુ દ્રવિણં ધેહિ ચિત્રમ્ ॥ ૨.૦૨૩.૧૫॥ ૨૮
મા નઃ સ્તેનેભ્યો યે અભિ દ્રુહસ્પદે નિરામિણો રિપવોઽન્નેષુ જાગૃધુઃ ।
આ દેવાનામોહતે વિ વ્રયો હૃદિ બૃહસ્પતે ન પરઃ સામ્નો વિદુઃ ॥ ૨.૦૨૩.૧૬॥ ૨૯
વિશ્વેભ્યો હિ ત્વા ભુવનેભ્યસ્પરિ ત્વષ્ટાજનત્સામ્નઃસામ્નઃ કવિઃ ।
સ ઋણચિદૃણયા બ્રહ્મણસ્પતિર્દ્રુહો હન્તા મહ ઋતસ્ય ધર્તરિ ॥ ૨.૦૨૩.૧૭॥ ૩૦

તવ શ્રિયે વ્યજિહીત પર્વતો ગવાં ગોત્રમુદસૃજો યદઙ્ગિરઃ ।
ઇન્દ્રેણ યુજા તમસા પરીવૃતં બૃહસ્પતે નિરપામૌબ્જો અર્ણવમ્ ॥ ૨.૦૨૩.૧૮॥ ૩૧
બ્રહ્મણસ્પતે ત્વમસ્ય યન્તા સૂક્તસ્ય બોધિ તનયં ચ જિન્વ ।
વિશ્વં તદ્ભદ્રં યદવન્તિ દેવા બૃહદ્વદેમ વિદથે સુવીરાઃ ॥ ૨.૦૨૩.૧૯॥ ૩૨

ઋષિઃ - ગૃત્સમદઃ ॥

દેવતા - ૧ - ૧૧, ૧૩ - ૧૬ બ્રહ્મણસ્પતિઃ; ૧૨ બ્રહ્મણસ્પતિરિન્દ્રશ્ચ ॥

છન્દઃ - ૧,૭, ૯, ૧૧ નિચૃજ્જગતી; ૨, ૩ ત્રિષ્ટુપ્ ૪, ૫ સ્વરાટ્ત્રિષ્ટુપ્; ૬, ૮, ૧૪ જગતી; ૧૦ સ્વરાડ્ જગતી; ૧૨, ૧૬ નિચૃત્ત્રિષ્ટુપ્ ; ૧૩ ભુરિગ્જગતી; ૧૫ ભુરિક્ત્રિષ્ટુપ્ ॥

સ્વરઃ - ૧, ૬ - ૧૧, ૧૩, ૧૪ નિષાદઃ ; ૨-૫, ૧૨, ૧૫, ૧૬ ધૈવતઃ ॥

સેમામવિડ્ઢિ પ્રભૃતિં ય ઈશિષેઽયા વિધેમ નવયા મહા ગિરા ।
યથા નો મીઢ્વાન્સ્તવતે સખા તવ બૃહસ્પતે સીષધઃ સોત નો મતિમ્ ॥ ૨.૦૨૪.૦૧॥ ૩૩
યો નન્ત્વાન્યનમન્ન્યોજસોતાદર્દર્મન્યુના શમ્બરાણિ વિ ।
પ્રાચ્યાવયદચ્યુતા બ્રહ્મણસ્પતિરા ચાવિશદ્વસુમન્તં વિ પર્વતમ્ ॥ ૨.૦૨૪.૦૨॥ ૩૪
તદ્દેવાનાં દેવતમાય કર્ત્વમશ્રથ્નન્દૃળ્હાવ્રદન્ત વીળિતા ।
ઉદ્ગા આજદભિનદ્બ્રહ્મણા વલમગૂહત્તમો વ્યચક્ષયત્સ્વઃ ॥ ૨.૦૨૪.૦૩॥ ૩૫
અશ્માસ્યમવતં બ્રહ્મણસ્પતિર્મધુધારમભિ યમોજસાતૃણત્ ।
તમેવ વિશ્વે પપિરે સ્વર્દૃશો બહુ સાકં સિસિચુરુત્સમુદ્રિણમ્ ॥ ૨.૦૨૪.૦૪॥ ૩૬
સના તા કા ચિદ્ભુવના ભવીત્વા માદ્ભિઃ શરદ્ભિર્દુરો વરન્ત વઃ ।
અયતન્તા ચરતો અન્યદન્યદિદ્યા ચકાર વયુના બ્રહ્મણસ્પતિઃ ॥ ૨.૦૨૪.૦૫॥ ૩૭
અભિનક્ષન્તો અભિ યે તમાનશુર્નિધિં પણીનાં પરમં ગુહા હિતમ્ ।
તે વિદ્વાંસઃ પ્રતિચક્ષ્યાનૃતા પુનર્યત ઉ આયન્તદુદીયુરાવિશમ્ ॥ ૨.૦૨૪.૦૬॥ ૩૮
ઋતાવાનઃ પ્રતિચક્ષ્યાનૃતા પુનરાત આ તસ્થુઃ કવયો મહસ્પથઃ ।
તે બાહુભ્યાં ધમિતમગ્નિમશ્મનિ નકિઃ ષો અસ્ત્યરણો જહુર્હિ તમ્ ॥ ૨.૦૨૪.૦૭॥ ૩૯
ઋતજ્યેન ક્ષિપ્રેણ બ્રહ્મણસ્પતિર્યત્ર વષ્ટિ પ્ર તદશ્નોતિ ધન્વના ।
તસ્ય સાધ્વીરિષવો યાભિરસ્યતિ નૃચક્ષસો દૃશયે કર્ણયોનયઃ ॥ ૨.૦૨૪.૦૮॥ ૪૦
સ સંનયઃ સ વિનયઃ પુરોહિતઃ સ સુષ્ટુતઃ સ યુધિ બ્રહ્મણસ્પતિઃ ।
ચાક્ષ્મો યદ્વાજં ભરતે મતી ધનાદિત્સૂર્યસ્તપતિ તપ્યતુર્વૃથા ॥ ૨.૦૨૪.૦૯॥ ૪૧
વિભુ પ્રભુ પ્રથમં મેહનાવતો બૃહસ્પતેઃ સુવિદત્રાણિ રાધ્યા ।
ઇમા સાતાનિ વેન્યસ્ય વાજિનો યેન જના ઉભયે ભુઞ્જતે વિશઃ ॥ ૨.૦૨૪.૧૦॥ ૪૨
યોઽવરે વૃજને વિશ્વથા વિભુર્મહામુ રણ્વઃ શવસા વવક્ષિથ ।

સ દેવો દેવાન્પ્રતિ પપ્રથે પૃથુ વિશ્વેદુ તા પરિભૂર્બ્રહ્મણસ્પતિઃ ॥ ૨.૦૨૪.૧૧॥ ૪૩
વિશ્વં સત્યં મઘવાના યુવોરિદાપશ્ચન પ્ર મિનન્તિ વ્રતં વામ્ ।
અચ્છેન્દ્રાબ્રહ્મણસ્પતી હવિર્નોઽન્નં યુજેવ વાજિના જિગાતમ્ ॥ ૨.૦૨૪.૧૨॥ ૪૪
ઉતાશિષ્ઠા અનુ શ઼ૃણ્વન્તિ વહ્નયઃ સભેયો વિપ્રો ભરતે મતી ધના ।
વીળુદ્વેષા અનુ વશ ઋણમાદદિઃ સ હ વાજી સમિથે બ્રહ્મણસ્પતિઃ ॥ ૨.૦૨૪.૧૩॥ ૪૫
બ્રહ્મણસ્પતેરભવદ્યથાવશં સત્યો મન્યુર્મહિ કર્મા કરિષ્યતઃ ।
યો ગા ઉદાજત્સ દિવે વિ ચાભજન્મહીવ રીતિઃ શવસાસરત્પૃથક્ ॥ ૨.૦૨૪.૧૪॥ ૪૬
બ્રહ્મણસ્પતે સુયમસ્ય વિશ્વહા રાયઃ સ્યામ રથ્યોઉ વયસ્વતઃ ।
વીરેષુ વીરાઁ ઉપ પૃઙ્ધિ નસ્ત્વં યદીશાનો બ્રહ્મણા વેષિ મે હવમ્ ॥ ૨.૦૨૪.૧૫॥ ૪૭
બ્રહ્મણસ્પતે ત્વમસ્ય યન્તા સૂક્તસ્ય બોધિ તનયં ચ જિન્વ ।
વિશ્વં તદ્ભદ્રં યદવન્તિ દેવા બૃહદ્વદેમ વિદથે સુવીરાઃ ॥ ૨.૦૨૪.૧૬॥ ૪૮

ઋષિઃ-ગૃત્સમદઃ॥

દેવતા - બ્રહ્મણસ્પતિઃ ॥

છન્દઃ - ૧, ૨ જગતી; ૩ નિચૃજ્જગતી; ૪, ૫ વિરાડ્જગતી ॥

સ્વરઃ- નિષાદઃ ॥

ઇન્ધાનો અગ્નિં વનવદ્વનુષ્યતઃ કૃતબ્રહ્મા શૂશુવદ્રાતહવ્ય ઇત્ ।
જાતેન જાતમતિ સ પ્ર સર્સૃતે યંયં યુજં કૃણુતે બ્રહ્મણસ્પતિઃ ॥ ૨.૦૨૫.૦૧॥ ૪૯
વીરેભિર્વીરાન્વનવદ્વનુષ્યતો ગોભી રયિં પપ્રથદ્બોધતિ ત્મના ।
તોકં ચ તસ્ય તનયં ચ વર્ધતે યંયં યુજં કૃણુતે બ્રહ્મણસ્પતિઃ ॥ ૨.૦૨૫.૦૨॥ ૫૦
સિન્ધુર્ન ક્ષોદઃ શિમીવાઁ ઋઘાયતો વૃષેવ વધ્રીઁરભિ વષ્ટ્યોજસા ।
અગ્નેરિવ પ્રસિતિર્નાહ વર્તવે યંયં યુજં કૃણુતે બ્રહ્મણસ્પતિઃ ॥ ૨.૦૨૫.૦૩॥ ૫૧
તસ્મા અર્ષન્તિ દિવ્યા અસશ્ચતઃ સ સત્વભિઃ પ્રથમો ગોષુ ગચ્છતિ ।
અનિભૃષ્ટતવિષિર્હન્ત્યોજસા યંયં યુજં કૃણુતે બ્રહ્મણસ્પતિઃ ॥ ૨.૦૨૫.૦૪॥ ૫૨
તસ્મા ઇદ્વિશ્વે ધુનયન્ત સિન્ધવોઽચ્છિદ્રા શર્મ દધિરે પુરૂણિ ।
દેવાનાં સુમ્ને સુભગઃ સ એધતે યંયં યુજં કૃણુતે બ્રહ્મણસ્પતિઃ ॥ ૨.૦૨૫.૦૫॥ ૫૩

ઋષિઃ-ગૃત્સમદઃ॥

દેવતા - બ્રહ્મણસ્પતિઃ ॥

છન્દઃ - ૧, ૩ જગતી; ૨, ૪ નિચૃજ્જગતી ॥

સ્વરઃ- નિષાદઃ ॥

ઋજુરિચ્છંસો વનવદ્વનુષ્યતો દેવયન્નિદદેવયન્તમભ્યસત્ ।
સુપ્રાવીરિદ્વનવત્પૃત્સુ દુષ્ટરં યજ્વેદયજ્યોર્વિ ભજાતિ ભોજનમ્ ॥ ૨.૦૨૬.૦૧॥ ૫૪
યજસ્વ વીર પ્ર વિહિ મનાયતો ભદ્રં મનઃ કૃણુષ્વ વૃત્રતૂર્યે ।
હવિષ્કૃણુષ્વ સુભગો યથાસસિ બ્રહ્મણસ્પતેરવ આ વૃણીમહે ॥ ૨.૦૨૬.૦૨॥ ૫૫
સ ઇજ્જનેન સ વિશા સ જન્મના સ પુત્રૈર્વાજં ભરતે ધના નૃભિઃ ।
દેવાનાં યઃ પિતરમાવિવાસતિ શ્રદ્ધામના હવિષા બ્રહ્મણસ્પતિમ્ ॥ ૨.૦૨૬.૦૩॥ ૫૬
યો અસ્મૈ હવ્યૈર્ઘૃતવદ્ભિરવિધત્પ્ર તં પ્રાચા નયતિ બ્રહ્મણસ્પતિઃ ।
ઉરુષ્યતીમંહસો રક્ષતી રિષોંઉઽહોશ્ચિદસ્મા ઉરુચક્રિરદ્ભુતઃ ॥ ૨.૦૨૬.૦૪॥ ૫૭

ઋષિઃ- વસિષ્ઠઃ ॥

દેવતા - ઇન્દ્રાબ્રહ્મણસ્પતી ॥

છન્દઃ - નિચૃત્રિષ્ટુપ્ ॥

સ્વરઃ - ધૈવતઃ ॥

તમુ જ્યેષ્ઠં નમસા હવિર્ભિઃ સુશેવં બ્રહ્મણસ્પતિં ગૃણીષે ।
ઇન્દ્રં શ્લોકો મહિ દૈવ્યઃ સિષક્તુ યો બ્રહ્મણો દેવકૃતસ્ય રાજા ॥ ૭.૦૯૭.૦૩॥ ૫૮

ઇયં વાં બ્રહ્મણસ્પતે સુવૃક્તિર્બ્રહ્મેન્દ્રાય વજ્રિણે અકારિ ।
અવિષ્ટં ધિયો જિગૃતં પુરંધીર્જજસ્તમર્યો વનુષામરાતીઃ ॥ ૭.૦૯૭.૦૯॥ ૫૯

ઋષિઃ- શિરિમ્બિઠો ભારદ્વાજઃ ॥

દેવતા - બ્રહ્મણસ્પતિઃ ॥

છન્દઃ- ૨ નિચૃદનુષ્ટુપ્ ૩ અનુષ્ટુપ્ ॥

સ્વરઃ - ગાન્ધારઃ ॥

ચત્તો ઇતશ્ચત્તામુતઃ સર્વા ભ્રૂણાન્યારુષી ।
અરાય્યં બ્રહ્મણસ્પતે તીક્ષ્ણશૃઙ્ગોદૃષન્નિહિ ॥ ૧૦.૧૫૫.૦૨॥ ૬૦
અદો યદ્દારુ પ્લવતે સિન્ધોઃ પારે અપૂરુષમ્ ।
તદા રભસ્વ દુર્હણો તેન ગચ્છ પરસ્તરમ્ ॥ ૧૦.૧૫૫.૦૩॥ ૬૧

??
અગ્નિર્યેન વિરાજતિ સૂર્યો યેન વિરાજતિ ।
વિરાજ્યેન વિરાજતિ તેનાસ્માન્ બ્રહ્મણસ્પતે વિરાજ સમિધં કુરુ ॥ ૧૦.૧૨૮.૧૨॥ ૬૨ (From Rigveda Khilas)

ઋષિઃ-પાયુર્ભારદ્વાજઃ ॥

દેવતા - યુદ્ધભૂમિર્બ્રહ્મણસ્પતિરદિતિશ્ચ ॥

છન્દઃ—પઙ્ક્તિઃ ॥

સ્વરઃ- પઞ્ચમઃ ॥

યત્ર બાણાઃ સમ્પતન્તિ કુમારા વિશિખા ઇવ ।
તત્રા નો બ્રહ્મણસ્પતિરદિતિઃ શર્મ યચ્છતુ વિશ્વાહા શર્મ યચ્છતુ ॥ ૬.૦૭૫.૧૭ ॥ ૬૩

ઋષિઃ-પ્રચેતાઃ ॥

દેવતા - દુઃસ્વપ્નઘ્નમ્ ॥

છન્દઃ - વિરાડનુષ્ટુપ્ ॥

સ્વરઃ- ગાન્ધારઃ ॥

યદિન્દ્ર બ્રહ્મણસ્પતેઽભિદ્રોહં ચરામસિ ।
પ્રચેતા ન આઙ્ગિરસો દ્વિષતાં પાત્વંહસઃ ॥ ૧૦.૧૬૪.૦૪ ॥ ૬૪

ઋષિઃ- નભઃપ્રભેદનો વૈરૂપઃ ॥

દેવતા - ઇન્દ્રઃ ॥

છન્દઃ - નિચૃત્ત્રિષ્ટુપ્ ॥

સ્વરઃ - ધૈવતઃ ॥

નિ ષુ સીદ ગણપતે ગણેષુ ત્વામાહુર્વિપ્રતમં કવીનામ્ ।
ન ઋતે ત્વત્ક્રિયતે કિં ચનારે મહામર્કં મઘવઞ્ચિત્રમર્ચ ॥ ૧૦.૧૧૨.૦૯ ॥ ૬૫

ઋષિઃ - બન્ધ્વાદયો ગૌપાયનાઃ ॥

દેવતા - હસ્તઃ ॥

છન્દઃ - નિચૃદનુષ્ટુપ્ ॥

સ્વરઃ - ગાન્ધારઃ ॥

અયં મે હસ્તો ભગવાનયં મે ભગવત્તરઃ ।
અયં મે વિશ્વભેષજોઽયં શિવાભિમર્શનઃ ॥ ૧૦.૦૬૦.૧૨ ॥ ૬૬

ઋષિઃ—કુસીદી કાણ્વઃ ॥

દેવતા-ઇન્દ્રઃ ॥

છન્દઃ- ૧, ૫, ૮ ગાયત્રી; ૨, ૩, ૬, ૭ નિચૃદ્ગાયત્રી; ૪, ૯ વિરાડ્ગાયત્રી ॥

સ્વરઃ —ષડ્જઃ ॥

આ તૂ ન ઇન્દ્ર ક્ષુમન્તં ચિત્રં ગ્રાભં સં ગૃભાય ।
મહાહસ્તી દક્ષિણેન ॥ ૮.૦૮૧.૦૧ ॥

વિદ્મા હિ ત્વા તુવિકૂર્મિં તુવિદેષ્ણં તુવીમઘમ્ ।
તુવિમાત્રમવોભિઃ ॥ ૮.૦૮૧.૦૨ ॥

નહિ ત્વા શૂર દેવા ન મર્તાસો દિત્સન્તમ્ ।
ભીમં ન ગાં વારયન્તે ॥ ૮.૦૮૧.૦૩ ॥

એતો ન્વિન્દ્રં સ્તવામેશાનં વસ્વઃ સ્વરાજમ્ ।
ન રાધસા મર્ધિષન્નઃ ॥ ૮.૦૮૧.૦૪ ॥

પ્ર સ્તોષદુપ ગાસિષચ્છ્રવત્સામ ગીયમાનમ્ ।
અભિ રાધસા જુગુરત્ ॥ ૮.૦૮૧.૦૫ ॥

આ નો ભર દક્ષિણેનાભિ સવ્યેન પ્ર મૃશ ।
ઇન્દ્ર મા નો વસોર્નિર્ભાક્ ॥ ૮.૦૮૧.૦૬ ॥

ઉપ ક્રમસ્વા ભર ધૃષતા ધૃષ્ણો જનાનામ્ ।
અદાશૂષ્ટરસ્ય વેદઃ ॥ ૮.૦૮૧.૦૭ ॥

ઇન્દ્ર ય ઉ નુ તે અસ્તિ વાજો વિપ્રેભિઃ સનિત્વઃ ।
અસ્માભિઃ સુ તં સનુહિ ॥ ૮.૦૮૧.૦૮ ॥

સદ્યોજુવસ્તે વાજા અસ્મભ્યં વિશ્વશ્ચન્દ્રાઃ ।
વશૈશ્ચ મક્ષૂ જરન્તે ॥ ૮.૦૮૧.૦૯ ॥

॥ ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

ઇતિ બ્રહ્મણસ્પતિસૂક્તં સમ્પૂર્ણમ્ ॥

These are Richa collections from Rigveda as per the numbers in the mandalas. The common sUkta ends at agniryena virAjati, number 62. The text however matches the audio clip recorded in the kAnchipuram ya jnashAlA, especially with the addendum of the mandala 8 sUkta 81.

The pronunciation of the words in sUkta even by Pandits is not proper
and user is requested to learn it from a scholarly teacher.
iti brahmaNaspatisUktaM sampUrNam ..

Proofread by Mandar Kulkarni

*Brahmanaspati Suktam*
pdf was typeset on February 17, 2025

Please send corrections to *sanskrit@cheerful.com*